# मेघदूतेऽलङ्कारानुशीलनम्

कृष्णराजज्ञवाली
उपप्राध्यापकः - साहित्यम्
नेपालसंस्कृतविश्वविद्यालयः - रुरुसंस्कृतविद्यापीठम्, रिडीगुल्मी
gyawalikrishnaraj450@gmail.com

## शोधसारः

महाकवेः कालिदासस्य नाम न केवलं संस्कृतसाहित्ये अपितु विश्वसाहित्येऽपि स्वर्णाक्षरेणाङ्कितुं योग्यं नामो विद्यते। तेन महाकविना विरचितानि महाकाव्यखण्डकाव्यनाटकानि आधारीकृत्य अन्ये कवयः काव्यानि विरचितानि सन्ति। अस्य कवेः 'मेघदूतम्' इति नामाख्यो ग्रन्थः खण्डकाव्यमस्ति । अस्मिन् खण्डकाव्ये महाकविः यक्षस्य प्रियतमाया वियोगावस्थाया मन्दाक्रान्ताछन्दसा विभिन्नानामलङ्काराणां प्रयोगेण विहितं हृदयस्पर्शि वर्णनं तस्य विश्वप्रसिद्धे एकं कारणमस्ति । प्रियाया वियोगेन देवयोनिविशेषस्य यक्षस्यापि एताद्दशी अवस्था भवति चेत् सामान्यमनुष्याणां वियोगः कीद्दशी भवति इति सामाजिकैरनुभूयते । अस्मिन्नालेखे 'मेघदूतम्' इति नामके खण्डकाव्ये कविना विभिन्नानामलङ्काराणां प्रयोगः कुत्र कुत्र विहितः, केन प्रकारेण अलङ्काराणां विन्यास कृतः इत्यनुसन्धानप्रसङ्गे विभिन्नानामलङ्कारशास्त्रिणामलङ्कारलक्षणं विविच्य अलंकारसिद्धान्तानुसारं मेघदूतेऽलङ्काराणां अनुशीलनं विधीयते । अत्र प्रयुक्ता अलङ्कारा भाषानुकूलाः, पात्रानुकूलाः, काव्यानुकूला दृश्यन्ते । अत्र विप्रलम्भ-श्रृङ्गाररसप्रतिपादने अर्थान्तरन्यासादयोऽलङ्काराः सहायका दृश्यन्ते । अतोऽलङ्कारप्रयोगदृष्ट्या मेघदूतमौचित्यपूर्णमस्ति इति निष्कर्षो निष्काशितः ।

**शब्दकुञ्जिका** – अप्रकृतः,अलङ्कारः, दूतम्, प्रकृतः, प्रकृतिः ।

## विषयपरिचयः

मेघो दूतो यस्मिन् तत् मेघदूतम् अर्थात् मेघो जलधरो दूतः सन्देशवाहकोऽस्ति यस्मिन् काव्ये तत् काव्यं मेघदूतमस्ति । मेघदूतं महाकवि कालिदास स्यानुपमं ग्रन्थरत्नं वर्तते । विश्वप्रसिद्धेऽस्मिन् काव्ये अनेकाषु भाषाषु भाषानुवादः प्राप्यते । काव्यमेतत् विभिन्नकाव्यलक्षणानुसारेण सुन्दरं काव्यमस्ति । यथा मम्मटस्य काव्यलक्षणं – "तददोषौशब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" (मम्मट,इ.२००६ : १३)

एतल्लक्षणानुसारेण काव्यमिदं गुणालङ्कारयुक्तं सुन्दरकाव्यमस्ति । पण्डितराज जगन्नाथानुसारेण– “रमणीयार्थप्रतिपादकः शब्दः काव्यम्” (जगन्नाथ, १९६३:१०) इति लक्षणानुरूपं विप्रलम्भश्रृङ्गाररसपरिपूर्णं काव्यमस्ति । पौरस्त्यकाव्यविवेचकशास्त्रेषु काव्यस्य द्वौ भेदौ कृतः श्रव्यकाव्यम्, दृश्यकाव्यञ्च । “दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधामतम्” ( विश्वनाथ २०६८:३१९) श्रव्यकाव्यस्यापि भेदाः सन्ति “गद्यपद्यमयं चम्पूः” (दण्डी, १९९१:१९) एवं च आचार्यविश्वनाथ- गद्यपद्यमयं काव्यं चम्पुरित्यभिधीयते (विश्वनाथ २०६८:४६०) तथा च पद्यकाव्यस्यापि त्रयो भेदाः सन्ति - महाकाव्यं खण्डकाव्यं कोषकाव्यञ्चेति । पौरस्त्यकाव्यलक्षणानुसारेण मेघदूतं खण्डकाव्यमस्ति “खण्डकाव्यं भवेत् काव्यस्यैकदेशानुशारी च (विश्वनाथ २०६८:४६५) मेघदूतखण्डकाव्यस्य द्वौ भागौ स्तः पूर्वमेघः उत्तरमेघश्चेति । अस्य नायको यक्षोऽस्ति । साहित्यदर्पणानुसारं धीरप्रशान्तनायकस्य लक्षणम् - सामान्यगुणैः भूयात् द्विजादिको धीरः प्रशान्त स्यात् (विश्वनाथ २०६८:९८) । इत्यनुसारं यक्षो धीरप्रशान्तः नायकोऽस्ति । एवं च दशरूपकानुसारं नायकलक्षणम्– नेताविनीतो मधुरस्त्यागी दक्षः प्रियम्वदः। रक्तलोक शुचिर्वाग्मी रुढवंशः स्थिरो युवा (धनञ्जयः, २०२४:१४३) एतल्लक्षणानुसारेण यक्षः उत्तमनायकोऽस्ति । स स्वप्रियायामेव आसक्ततत्वाद् अनूकूलो नायकोऽस्ति । अनुकूलः एकनिरतः (विश्वनाथ १९८८:१४३)

महाकवेः कालिदासस्य विप्रलम्भश्रृङ्गाररसप्रधानं विविधसूक्तिभरितं सहृदयहृदयाकर्षकं विश्वप्रसिद्धं मेघदूतं नामकं खण्डकाव्यम् मन्दाक्रान्ताच्छन्दसा पर्वतश्रृङ्गात् प्रवहन्ती विप्रलम्भ श्रृङ्गाररसस्य निर्झरिणी अस्ति । अस्मिन् खण्डकाव्ये यक्षः स्वकर्मप्रमादात् स्वामिनः कुवेरस्य वर्षैकभोगयोग्यात् शापात् प्रियाया वियुक्तत्वेन चित्रकुटपर्वते स्वसमयं यापयतीतीत्यस्माद् कथानकाद् काव्यं प्रारभ्यते यथा –

कश्चित् कान्ता विरहगुरुणा स्वाधिकारात् प्रमत्तः
शापेनास्तंगमितमहिमावर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगीर्याश्रमेषु ।। (कालिदासः इ १९९२ : पूर्वमेघः१)

स्वविरहवेदनया यक्षो चेतनाचेतनेषु अपि भिन्नतामदृष्ट्वा जडं मेघं दूतत्वे प्रेषयति, तदौचित्यं दर्शयति यथा –

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।। (पूर्ववत् : ५)

एवं प्रकारेण यक्षो स्वसन्देशाहरणाय मेघं प्रेरयति तदौचित्यञ्च प्रर्दशयति ।

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरवन्धुर्गतोऽहं
याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ।। (पूर्ववत् : २)

तदनन्तरं यक्षो मेघं प्रति स्वनगर्या अलकापूर्यागमनमार्गं निर्दिशति । तत्प्रसङ्गे मार्गे स्थितानां आम्रकूटपर्वतम्, निर्विन्ध्यादिनदीनाम्, उज्जयिन्याञ्च मनोरमं श्रृङ्गारिकं वर्णनं करोति कविः । स्वराजधान्या अलकापूर्या वर्णनम् उत्प्रेक्षामाध्यमेन चारुतया करोति यक्षः । यथा–

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादूकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ।। (पूर्ववत् : ३६)

अत्र कविः अलकपूर्या उन्नतत्वं सहजज्ञातत्वं च दर्शयति । यक्षमुखात् अनन्तरं उत्तरमेघेऽपि यक्षो अलकापूर्याः सौन्दर्यवर्णनानन्तरं स्वप्रियायाः स्वरूपसौन्दर्यं वर्णयति यथा -

तन्वी श्यामा शिखरिदशना पक्वबिम्वाधरोष्ठी
मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभिः ।
क्षोणिभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ।। (कालिदासः उत्तरमेघ : १९)

यक्षो मेघं प्रति स्वप्रियतमाया परिचयव्याजेन तस्या ओष्ठनयनाद्यङ्गानां सौन्दर्यं वर्णयति । तत्पश्चात् यक्षो मेघं प्रति स्वप्रियायै सन्देशं व्रूते यथा–

तामामुष्मन्मम च वचनादात्मनश्चोपकर्तुं
ब्रूया एवं तव सहचरो रामगीर्याश्रमस्थः ।
अव्यापन्न कुशलमवले ! पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणीनामेतदेव ।। (पूर्ववत् : ३८)

अत्र यक्षो मेघं प्रति स्वप्रियायैः रामगीर्याश्रमस्थस्य प्रियावियुक्तस्य स्वस्य क्षेमकुशलावस्थां कथयितुं प्रेरयति । प्रियायासन्देशवचनप्रसङ्गे यक्षो कथयति–

त्वामालिख्य प्रणयकुपितां धातुरागैशिलाया–
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।

अस्रैस्तावन् मुहुरूपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिनपि न सहते सङ्गमं नौ कृतान्तः ।। (पूर्ववत् : ४२)

धन्यो महाकवि कालिदासः, इदृशी विप्रलम्भ श्रृङ्गाररसनिर्झरिणि तस्य काव्ये प्रवहति ।

खण्डकाव्यस्यान्ते यक्षस्य सन्देशं तत्प्रियां प्रति प्रापयति मेघः । एवंरित्या महाकविकालिदासो मेघदूते यक्षस्य जीवनस्यैकांशमादाय खण्डकाव्यमिदं निर्माति । खण्डकाव्येऽस्मिन् यक्षो स्वसन्देशाहरणाय मेघस्य प्रयोगात् दूतकाव्यत्वेनापि चित्रितमस्ति काव्यमिदम् । खण्डकाव्यमिदम् अनेकाषु भाषाषु भाषानुवादयुक्तमस्ति ।

**समस्याकथनम्**

महाकविकालिदासो न केवलं संस्कृतसाहित्ये अपितु विश्वसाहित्येऽपि सर्वोत्कृष्टो विद्यते । कालिदास स्य मेघदूतम् इति नामकं खण्डकाव्यं सकलसंसारे सुप्रसिद्धमस्ति । समालोचकैः टीप्पणीकारैश्च एतत्ग्रन्थानुसारेण विभिन्नविषयाणां विवेचना कृता । परन्तु प्रयोगदृष्ट्या मेघदूतस्य अलङ्काराणां गहनविवेचनं केनापि न कृतम् । प्रस्तुतेऽस्मिन्नालेखे अनुभूयमाने प्रमुखे समस्ये अधोनिर्दिष्टे स्तः

१. मेघदूते केषां केषामलङ्कारणां प्रयोगोऽस्ति ?
२. मेघदूते अलङ्काराणां कीदृशः प्रयोगो विद्यते ?

**उद्देश्यकथनम्**

प्रस्तुतस्य आलेखस्योद्देश्ये प्रमुखतया निम्नलिखिते स्तः

१ मेघदूते प्रयुक्तानामलङ्काराणामनुशीलनम् ।
२ मेघदूते प्रयुक्तानामलङ्काराणां विवेचनम् ।

**अध्ययनविधि**

अध्ययनेस्मिन् पुस्तकालयीयानां सामग्रीणां प्रयोगो विद्यते । मेघदूतविषये लिखितानि पुस्तकानि, विचाराः लेखाश्चात्र सामग्रयःसन्ति । ताषां संकलनं विधाय विश्लेषणं कृतमस्ति । पुस्तकालयविधिमवलम्व्य प्रस्तुताध्यने व्याख्यात्मकाः वर्णमात्मकाश्च विधयः प्रयुक्ताः । अत्र सम्प्रति प्रचलिताया ए.पी.ए. पद्धत्याः प्रयोगो विहितो वर्तते ।

**अध्ययनस्य क्षेत्रसीमाङ्कनम्**

अस्मिन् अध्ययने मेघदूतखण्डकाव्ये प्रयुक्तानामलङ्काराणां सम्यग् समीक्षणमस्ति । अस्मिन् खण्डकाव्ये श्लोके श्लोके नैकालङ्काराः, अनेकेषु अलंकारेषु मध्ये प्रमुखशब्दालङ्काराणां तथा च

प्रमुखार्थालङ्काराणामध्ययनं विहितमस्ति । तत्र स्थितानां प्रमुखालङ्काराणामनुशीलन,ं विवेचनञ्च, सीमात्वेन निर्धारितमस्ति ।

**पूर्वकार्यसमीक्षा**

मेघदूतखण्डकाव्यस्य विविधविषयमवलम्व्याध्ययनमनुसन्धानं जातमस्ति । एतानि पूर्वकार्याणि संक्षेपेण प्रस्तूयन्ते ।

उपाध्याय कृष्णदेव निवन्ध चन्द्रिका षष्ठम् सस्करणं १९८२ ई. वाराणसी चौखम्वा ओरियन्टालिया प्रकाशन इति पुस्तकस्य संस्कृत काव्येषु प्रगतिशीलत्वम् इति शीर्षके मेघदूतस्यापि चर्चा विदधाति । अत्र कथयति यत् —

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
जायते न काव्याङ्गमहो भारो महान् कवेः ।। (उपाध्याय, ई. १९८२ : ८१)

मेघदूतस्यैव अध्ययनेन आचार्यै उद्घोषितमिदं उद्गारं कालिदास स्य वैशिष्ट्यं द्योतयति ।

उपाध्याय बलदेव संस्कृत साहित्यका इतिहास इ.स.१९९७ दशम् सं. इति पुस्तकस्य सप्तमपरिच्छेदे लौकिक गीतिका इति शीर्षके मेघदूतस्य विषये कथयति यत् - मेघदूतं वस्तुतः विरहपीडितउत्कण्ठितहृदयस्य मर्मशपर्शी वेदना विद्यते, यया वेदनाया मेघदूतस्य प्रत्येकपद्ये प्रेम्णो विह्वलतायाः, विवसतायाः, विकलतायाश्च अभिव्यञ्जयन्ति । पूर्वमेघः वाह्यप्रकृतेः मनोरमं चित्रणमस्ति, उत्तर मेघस्तु अन्तरप्रकृतेः अनुभवालम्बितमभिरामवर्णनमस्ति (उपाध्यायः, इ. १९९७ : ३२५ ।

मेघदूतस्य व्याख्याकारः शेषराजशर्मा उपोद्घात इति शीर्षके कालिदास स्य विषये कथयति– महाकविकालिदासो जडरुपाया प्रकृतेर्मानवचेतसा सह सूक्ष्मं सम्बन्धं प्रकाशयितुं समर्थस्तदेव तस्य लोकोत्तरं वैशिष्ट्यम् ( शर्माः, इ. १९९२ : १७ )

रघुवंशमहाकाव्यस्य व्याख्याकारः श्रीकृष्णमणित्रिपाठी प्राक्कथनप्रसङ्गे कथयति– प्रकृतेः मनोरमचित्रणे कालिदासोऽद्वितीयोऽस्ति । प्रकृत्या सह कालिदास स्य साहचर्यमपूर्वम् । प्रकृतेः गूढरहस्योद्घाटने संस्कृतजगति कालिदासोऽन्यानतिशेते ( त्रिपाठी, इ.१९८७ : ३ )

अभिज्ञानशाकुन्तलस्य व्याख्याकारः डा. श्रीकृष्णमणि त्रिपाठी भूमिकाखण्डे कालिदास की प्रकृति प्रेम इति शीर्षके कालिदासः प्रकृतिं मनुष्यजीवनेन सहाभिन्नं मन्यते । तेन प्रकृतिमानवजीवनयोः पूरकत्वेन चित्रितम् । ( त्रिपाठी इ.१९९३ : २१)

प्रवन्धरत्नाकरे डा.रमेशचन्द्रशुक्लो मेघदूते कालिदास इति शीर्षके कथयति मेघदूतस्य अपारसौन्दर्यमस्ति प्रकृतिसुषमायाश्चारुतया चित्रणम् । आदितोद्रन्त्यं यावत् काव्यमिदम् प्रियायाः

प्रकृतेरनवद्यानि अवदातानि च विविधानि वहुलानि दृश्यानि प्रस्तावीति कविः । वस्तुतः सत्यन्विदं यत् काव्यमेतत् प्रकृतेरेव काव्यमस्ति । (शुक्ल इ. १९८३ : ३०१)

रुरुसंस्कृतविद्यापीठप्रकाशितस्य रुरुप्रभा वर्ष ७ अङ्क ५ अनुसन्धानात्मकपत्रिकायाः मेघदूते प्रकृति चित्रणम् इति शीर्षके कृष्णराज ज्ञवाली कथयति — तत्र भवता कालिदासेन मेघं मूर्तरुपं प्रदश्र्य मानवस्य सुखे प्रकृति हसति, मानवस्य दुःखे रोदीति प्रकृतिं चित्रितमस्ति । (ज्ञवाली, २०७८ : १३)

महाकवि कालिदास स्य रघुवंशमहाकाव्यस्य उपोद्घात इति शीर्षके जनार्दनपाण्डेयो मेघदूतस्य चर्चां करोति । यथा — मेघदूतं सर्वेषु ग्रन्थेषु मध्ये प्रियतमो ग्रन्थो वर्तते । अस्य प्रमाणं अनेकाषु भाषाषु अस्यानुवादोऽस्ति, ग्रन्थमिममादर्शं मत्वा संस्कृतवाङ्मये दूतकाव्यानां रचना कृताः कविभिः । (पाण्डेयः इ. सं, १९७८ : १३ )

## अलङ्कारसिद्धान्तः

व्याकरणानुसारं अलं पूर्वकाद् कृ धातोः घञ् प्रत्ययेन निस्पन्नस्यालङ्कारशब्दस्य व्युत्पत्तिः अलं क्रियते अनेनेत्यलङ्कार अथवा अलंकरोतीति अलङ्कारो भवति । करणप्रधानो व्युत्पत्या अलङ्कारशब्दः शरीरशोभावद्र्धकानां हारादिनामिव रसादिनुपकारपूर्वकं काव्यशोभासम्पादकानामनुप्रासोपमाद्यलङ्काराणां वाचकः । काव्यशोभाधायकमलङ्कारं यथा परिभाषयति दण्डी स्वकाव्यादर्शे- काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते, (दण्डी, इ.सं,१९९१ : ७४) इति काव्यशोभाकारिणो गुणरीत्यादयः सर्वे धर्मा अलङ्कारपदवाच्या । वामनपूर्ववर्तिनो भामहभट्टोद्भटरुद्रटादया आचार्याः गुणालङ्कारयोरभेदमङ्गीकुर्वन्ति । वामनस्तु काव्यशोभायाः कर्तारो धर्मा गुणाः । (वामन, इ.सं. २००२ : ८७ ), तदतिशयहेतवस्त्वलङ्काराः (वामनः, इ.सं. २००२ : ८८) इति सिद्धान्तं प्रकटयित्वा गुणालङ्कारयोः भेदो प्रकटयति । तेन वामनेनालङ्कारं लक्षयति -सौन्दर्यमलङ्कारः (वामन इ.सं. २००२ : ६) । ध्वन्यालोककार आनन्दवर्धनाचायर्ः काव्यस्यात्मभूते रसे तदङ्गभूतयो शब्दार्थयोरङ्गरुपेणाश्रिता अलङ्कारा हारकेयूरादिवत् भवन्ति इति प्रतिपादयति - तमर्थमवलम्बन्ते येद्रङ्गिनं ते गुणाः स्मृताः । अङ्गाश्रितास्त्वलङ्कारामन्तव्याः कटकादिवत् (आनन्दवर्धनः, इ.सं. १९९२ : ३४१ ) । काव्येऽलङ्कारा अङ्गित्वेन न प्रयोक्तव्या अपितु अङ्गत्वेन प्रयोगतव्याः। तथा च अलङ्काराः काव्ये अङ्गिनमुपकारकत्वेन च प्रयोज्या भवन्ति उक्तं च मम्मटेन–

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचिद्
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।। (मम्मटः, इ.सं.२००१ : ३९९)

तथैव साहित्यदर्पणे अलङ्कारं यथा–

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।

रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादयः ।। (विश्वनाथः, २०६८ : ६०५)

यथा हारकेयूरादयोऽलङ्काराः शरीरस्य शोभां वद्र्धयन्ति, उपकुर्वन्ति च तथैव अनुप्रासोपमादयोः अलङ्काराः काव्यस्यात्मभूतं रसमुपकुर्वन्ति, चमत्कारमुत्पादयन्ति च । तथा चोक्तं आचार्यकुन्तकः वक्रोक्तिः काव्यजीवितम् एवं च आचार्यवैद्यनाथः स्वालङ्कारचन्द्रिकायाम् अलंकारं यथा परिभाषयति–

अलङ्कारत्वञ्च रसादिभिन्नाव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयतासम्वन्धावच्छिन्ना चमत्कृतिजनकता तदवच्छेदकत्वम्(रुय्यक इ.सं. १९९४, भूमिका : १२)

रसभावादिभिन्न चमत्कारकारकोऽलङ्कारः।

ध्वनिवाद्याचार्याआनन्दवर्धनमम्मटादय काव्येऽलङ्काराणां गौणस्थानं शब्दार्थयोऽनियतधमर्ताञ्च स्वीकुर्वन्ति । अलङ्कारसम्प्रदायप्रवर्तकस्य भामहस्य अलङ्कारविषयकं मतमाधारीकृत्य दण्ड्युभ्दटरुद्रटादया आचार्याः काव्येऽलङ्कारतत्वमेव प्रधानमिति स्वीकुर्वन्ति ।

**मेघदूतेऽलङ्कारप्रयोगः**

शब्दार्थालङ्काररुपं भेदद्वयमाधारीकृत्य अत्र महाकवे कालिदास स्य मेघदूतम् नामके खण्डकाव्ये विद्यमानानामलङ्काराणां समीक्षा विधीयते । महाकविना कालिदासेन अत्र एकस्मिन्नपि श्लोके विविधानामलङ्काराणां प्रयोगो विहित । मेघदूतखण्डकाव्ये स्थितेषु श्लोकेषु अत्यधिकानामलङ्काराणां प्रयोगो द्दश्यते । परन्तु अस्मिन्नालेखे मूख्यरूपेण द्दष्टिपथमागतानां प्रमुखालङ्काराणां विवेचनं क्रियते ।

**शब्दालङ्काराः**

मेघदूते प्रयुक्ता ये अलङ्काराः शब्दमाश्रित्य काव्ये चमत्कारमुत्पादयन्ति ते अलङ्काराः शब्दालङ्काराः, अर्थात् यत्र शब्दपरिवृत्यसहत्वम् तत्र शब्दालङ्कारत्वम् । मेघदूतखण्डकाव्ये अर्थालङ्कारापेक्षया शब्दालङ्काराणां न्यूनप्रयोगो द्दश्यते । यथा तत्र प्रयुक्ता शब्दालङ्काराः–

***अनुप्रासः***

स्वरभिन्नत्वेऽपि व्यञ्जनवर्णानामावृत्तिः अनुप्रासः । यथा साहित्यदर्पणे अनुप्रासः–
अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्ययत् (विश्वनाथः, २०६८ : ६०८)।

अनुप्रासः पञ्चविधः छेकानुप्रासः,वृत्त्यनुप्रासः, श्रुत्यनुप्रासः,अन्त्यानुप्रासः लाटानुप्रासश्च । यथा मेघदूते अनुप्रासस्य उदाहरणम्

अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं
सास्रेणास्रद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।

उष्णोच्छ्वासं समधिकतरोच्छ्वासिनी दूरवर्ती
संकल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः ।।(कालिदासः, इ.सं. १९९२ उ मे : ३९) ।।

अत्र अङ्गेनाङ्गमित्यत्र अकारङकारगकाराणां आवृत्तिः, तप्तेन तप्तमित्यत्र तकारपकारयो आवृत्तिः साश्रेणासमित्यत्र सकाररकारयो आवृत्तिः,उत्कण्डमुत्कण्डितेन इत्यत्र उकारतकारयोरावृत्तिः, कण्ठस्यापि आवृतिः अनुप्रासालङ्कारः ।

अस्मिन्नेव श्लोके यक्षो स्वसन्देशबाहकमेघस्य स्ववियोगाद् कृशशरीरायाः पत्न्याश्च प्रशंसनात् समालङ्कारोऽपि वर्तते अत्र । समालङ्कारस्य लक्षणं यथा साहित्यदर्पणे– समं स्यादानुरुप्येण श्लाघा योग्यवस्तुनः( विश्वनाथः, (२०६८ : ८०१) ।

अर्थात् योग्यवस्तुनः औचित्येन आनुरुप्येण च प्रशंसनं समम् ।

***यमकम्***

यमकालङ्कारस्य लक्षणं यथा –
सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।। (विश्वनाथः २०६८ : ६१६)
अर्थे सति अर्थभिन्नानां वर्णानां तेनैव क्रमेणावृत्तिर्यमकम् कथ्यते ।
यमकस्य उदाहरणं यथा मेघदूते–
प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम् ।। (कालिदासः, १९९२ : पू.मे. ३०)

अस्मिन् श्लोके उत्तराद्र्धे विशालां विशालामित्यत्र यमकालङ्कारः । अत्र दिवः खण्डमिव इत्यत्र उज्जयीन्या खण्डत्वेन सम्भावनमुत्प्रेक्षा अपि वर्तते ।

***श्लेषालङ्कारः***

अनेकार्थकैः पदैरनेकार्थाभिधाने श्लेषः कथ्यते । यथा श्लेषलक्षणम्–
श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते । (विश्वनाथः, २०६८ : ६२३)
उदाहरणं यथा मेघदूते–
वीचिक्षोभस्तनितविहगश्रेणीकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य

स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ।। (कालिदासः, १९९२ : पू.मे २८) ।।

अस्मिन् श्लोके रसाभ्यन्तरो भव इत्येत्र नदीपक्षे रसः–जलम्, नायिकापक्षे रसः–प्रेमरसः ( श्रृङ्गाररसः) इत्यर्थो भवति । अतोऽत्र श्लेषालङ्कारः ।

**मेघदूते अर्थालङ्काराणां प्रयोगः**

अर्थमाश्रित्य काव्ये ये अलङ्कराः चमत्कारमुत्पादयन्ति ते अर्थालङ्काराः । अर्थात् यत्र शब्दपरिवृत्तिसहत्वं तत्र अर्थालङ्कारत्वमिति । मेघदूते कालिदासेन चतुर्विंशादधिका उपमार्थान्तरन्यासोत्प्रेक्षारूपकादयाः अर्थालङ्कारा विन्यासिताः । मुख्यरूपेण दृष्टिपथमागतानामर्थालङ्काराणां अस्मिन्नालेखे विविच्यते ।

***उपमा अलङ्कारः***

भिन्नयोरपि उपमानोपमेययोः साधर्मेण सादृश्यमुपमालङ्कारो भवति ।

यथा मम्मटः कथयति उपमालङ्कारस्य लक्षणम्–

साधर्म्यमुपमाभेदे (मम्मटः, २००६ : ४४३।

तथा च उपमाविषये कुवलयानन्दे

उपमा यत्र सादृश्यं लक्ष्मीरुल्लसति द्वयोः ( दीक्षितः, १९९२ : २)

यत्र द्वयोः उपमानोपमेययोः चमत्कारजनकं सादृश्यं भवति तत्र उपमालंकारः । उपमायां चत्वारि घटकतत्त्वानि भवन्ति । यथा उपमानम्, उपमेयः, साधारणधमर्ः, वाचकपदश्च, । उपमायाः उदाहरणं यथा मेघदूते–

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्यगौरं तुषारैः ।
बक्ष्यस्यध्वश्रमविनयने तस्य श्रृङ्गे निषण्णः
शोभां शुभ्रत्रिनयवृषोत्खातपङ्कोपमेयाम् ।। (कालिदासः, १९९२ : पु.मे. ५२) ।

अस्मिन् श्लोके कविः हिमशिखरे पदन्यस्तं मेघं भगवतो शिवस्य श्वेतवृषभेण सह तुलयति । अत्र मेघ उपमेयम्, वृषभोपमानम्, उपमेयमिति वाचकपदम् श्वेतत्वं साधारणधर्मः । अत उपमालङ्कारः।

***अर्थान्तरन्यासः***

सामान्यं विशेषेण विशेषं सामान्येन वा समर्थनमर्थान्तरन्यासः । यथा–

सामान्यं वा विशेषेण विशेषस्तेन वा यदि
कार्यं च कारणेनेदं कार्येण च समथ्र्यते।।
साधर्मेणेतरेणार्थान्तिरन्यासोऽष्टधा ततः । (विश्वनाथः, २०६८ : ७८०)

अर्थान्तरन्यासस्य मेघदूते उदाहरणं यथा–

जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरुपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशाद् दूरवन्धुर्गतोऽहम्
याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ।। ( कालिदास , पू.मे. ६) ।

अत्र यक्षो मेघं भुवनप्रथिते पुस्करावर्तकानां वंशे उत्पन्न इन्द्रस्य कामरुपं प्रकृतिपुरुषरूपत्वेन कथयति । अतः उन्नतवंशोद्भवत्वाद् प्रियावियुक्तोऽहं त्वयि याचकत्वेन आगतोऽस्मि ।

इति विशेषार्थं, निष्फलाऽपि याचना अधिकगुणे वरं, अधमे तु लब्धकामा अपि न वरं इति सामान्यवाक्येन समर्थनम् । अतोऽर्थान्तरन्यासः ।

***काव्यलिङ्गम्***

यथा काव्यलिङ्गस्य लक्षणम्–

हेतोर्वाक्यपदार्थत्वे काव्यलिंगं निगद्यते । (विश्वनाथः, २०६८ : ७८५)।

कस्यापि वाक्यस्य वाक्यार्थ पदार्थो वा यत्र हेतुत्वेन निर्दिष्टः, तत्र काव्यलिंगालंकारो भवति । तथा च मम्मटेन काव्यलिंगं यथा निर्दिशति । काव्यलिंगं, हेतोर्वाक्यपदार्थता । (मम्मट, : सन् २००६ : ५१०) ।

मेघदूते काव्यलिंगस्योदाहरणं यथा

कश्चित् कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ( कालिदास , पू.मे १) ।

अस्मिन् श्लोके महाकविर्कालिदासः स्वाधिकारात् प्रमत्तः यक्षः स्वामिशापात् वर्षैकं स्वप्रियावियुक्तत्वेन रामगिर्याश्रमेषु निवासं चकार इति कथयति । अत्र स्वामिनः शापस्य कारणं "स्वाधिकारात्प्रमत्तः" इति पदार्था दत्तः । अतः अत्र काव्यलिंगालङ्कारो वर्तते ।

***समासोक्तिः***

समानैः कार्यै लिङ्गैः विशेषणैश्च प्रस्तुते अप्रस्तुतस्य व्यवहारसमारोपः समासोक्ति । यथा–

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणै : ।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः (विश्वनाथः२०६८ : ७५४)।।

तथा च कुवलयानन्दे समासोक्तिः

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् (दीक्षित, सन् १९९२ : ८४) ।

अर्थात् प्रस्तुते अप्रस्तुतस्य सम्यकज्ञानं यत्र भवति तत्र समासोक्तिरलङ्कारः।

मेघदूते समासोक्तेरुदाहरणम् यथा–

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरुपं

सन्देशं मे तदनु जलद ! श्रोष्यसि श्रोत्रपेयम् ।

खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र

क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ।। ( कालिदास , पूर्वमेघ श्लोक १३)।

अस्मिन् श्लोके उत्तरार्धे समानकार्यवसात् मेघे पथिकस्य व्यवहार समारोपः समासोक्तिः

*निदर्शना*

द्वयोः वाक्यार्थयोः वस्तुसम्बन्धः क्वचित् सम्भवन् क्वचित् असम्भवन्नपि बाधप्रतिभासात् यत्र विम्बप्रतिविम्बभावेन सादृश्यं व्यञ्जनावृत्या वोध्यते सा निदर्शना । यथा साहित्यदर्पणे—

सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वाऽपि कुत्रचित् ।

यत्र विम्वानुविम्बत्वं वोधयेत् सा निदर्शना ।। (विश्वनाथ, २०६८ : ७४१) ।

तथा च काव्यप्रकाशे निदर्शना

अभवन् वस्तुसम्बन्धः उपमापरिकल्पकः निदर्शना (मम्मट, सन् २००६ : ४७४) ।

निदर्शनाया उदाहरणं मेघदूते यथा–

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः

सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः।

नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां

शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ।। (कालिदास , पू. मे. श्लोक ३६) ।

अस्मिन् श्लोके सन्ध्यायाः तेजो धारण– भगवता शिवेन धारितम्, गजाशुरचर्मणोत्पन्न पार्वत्या भयहरणयोः द्वयोः वस्तुनोः सम्बन्धोऽसम्भवन् अन्ते तेजो धारणं भयहरणमिव इति विम्बप्रतिविम्बभावेन सादृश्यकल्पनाद् निदर्शना अलङ्कारः ।

*तुल्ययोगिता*

यत्र प्रस्तुतानां पदार्थानां वा अप्रस्तुतानां पदार्थानाम् एकधर्माभिसम्बन्धः स्यात् तदा तुल्ययोगिता अलङ्कारः । यथा–

पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् । एक धर्माभिसम्बन्धः स्यात् तदा तुल्ययोगिता ।।

(विश्वनाथः, २०६८ : ७३२)।

तुल्ययोगितायारुदाहरणं मेघदूते यथा–

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं

पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।

लाक्षारागं चरणकमलभ्यासयोग्यं च यस्या -

मेकः सूते सकलमवलामण्डनं कल्पवृक्ष : ।। ( कालिदास , उ.मे. श्लोक-११) ।

अस्मिन् श्लोके अलकापुरी वर्णनप्रसङ्गे कल्पवृक्षः सुन्दरीणां वस्त्राणि, सूरा, सपल्लवं कुसुमं, अनेकविधानि भूषणानि च उत्पादयामास इति कथयति यक्षः। अत्र वस्त्रमद्यादिसकलप्रस्तुतपदार्थानां उत्पादनरुपैकधर्मतया वर्णनं तुल्ययोगिता अलङ्कारः।

***युक्तिः***

युक्तिः अप्पयदीक्षितस्य नवीनोऽलङ्कारः । यत्र क्रियया कश्चित् रहस्यवस्तु गोपनम् तत्र युक्तिः । यथा लक्षणम्–

युक्तिर्परातिं सन्धानं क्रियया मर्मगुप्तये । (दीक्षितः, १९७३, पृ.२५६) ।

परन्तु मम्मटविश्वनाथादय युक्तिः व्याजोक्तौ अन्तर्भावयन्ति । मम्मटाद्याचार्याननुश्रीतो आचार्यविश्वेश्वर कथयति स्वालङ्कारकौस्तुभे–व्याजोक्तिर्विशदिभवदर्थस्यापन्हुतिर्मिषत । (विश्वेश्वरः,१९८७,३५७ ) ।

अर्थात् प्रकटिकृतार्थस्य केनापि व्याजेन गोपनम् व्याजोक्ति । परन्तु अप्पयदीक्षितः युक्तिव्याजोक्त्योः भेदं कथयति । यथा–

व्याजोक्तावाकारगोपनम्, युक्तौ तदन्यगोपनमितिभावः (दीक्षितः,ऐ. २५७) ।

व्याजेन आकारगोपनम् व्याजोक्ति । युक्त्या तदन्यगोपनं युक्ति : ।

मेघदूते युक्त्यलङ्कारस्य उदाहरणं यथा—

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः ?<br>
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ? ।<br>
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे<br>
कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।। (कालिदासः, १९९२, पू मे ५)

अत्र यक्षः स्वप्रियाया विरहवेदनया चेतनाचेतनेषु भेदमदृष्ट्वा जडं मेघं दूतत्वेन प्रार्थयति । यक्षस्य अविवेकत्वरूपगोपनाय “कामार्ता चेतनाचेतनेषु स्वाभाविक कृपणा भवन्ति” इति युक्तिदर्शनम् युक्तिः अलङ्कारः ।

***उत्प्रेक्षालङ्कारः***

प्रकृतस्य (उपमेयस्य) उपमानत्वेन ( अप्रकृतत्वेन) सम्भावनम् उत्प्रेक्षालङ्कारः । यथा–

भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना । (विश्वनाथः, २०६८ : ७०६) ।

मेघदूते उत्प्रेक्षालङ्कारस्योदाहरणं यथा–

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां<br>
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।<br>
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः<br>
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ।। ( कालिदास , पू.मे.३१) ।।

अस्मिन् श्लोके उज्जयिनीवर्णनप्रसङ्गे महाकविकालिदासो यक्षमुखात् उज्जयिन्यां प्रातः श्रुतिमधुरं सारसरवरम्, कमलसंसर्गसिप्रानदीवायुः सुरतप्रार्थनाया अनुशीलः प्रीयतम इव ललनानां रतिपरिश्रमं निवारयति इति कथयति । अत्र सारससिप्रानद्यादीनां प्रीयतमत्वेन सम्भावनमुत्प्रेक्षालङ्कारः ।

***परिणामालङ्कारः***

उपमानस्य उपमेयरूपत्वेन परिणमनात् परिणामालङ्कारः । यथा–

विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि ।
परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधाः ।। (विश्वनाथः, २०६८ : ६८८) ।

तथा कुवलयानन्दे परिणामालङ्कारः–

परिणाम क्रियार्थश्चेत् विषयीविषयात्मन (दीक्षित, १९९२ : २२) ।

यत्र विषयिविषयस्वरुपेण परिणतो भूत्वा (कियार्थः) प्रकृतस्य उपयोगी चेत् तदा परिणामालङ्कारः । एवं अलङ्कारसर्वस्वे परिणामालङ्कारः–

आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः ।(रुय्यक,इ १९९४ : १२२) ।

परिणामालङ्कारस्योदाहरणं मेघदूते यथा–

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थ यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गः सजलनयनैःस्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ।। (कालिदसः, पू.मे. २२) ।।

अप्रकृतस्य स्वागतवचनस्य प्रकृतस्य शीध्रगमनरूपकार्यस्य उपयोगित्वाद् परिणामालङ्कारः ।

***अतिशयोक्तिः***

अध्यवसायस्य सिद्धत्वे सति अतिशयोक्तिरलङ्कारो भवति । यथा–

सिद्धत्वेऽध्यवसास्यातिशयोक्तिर्निगद्यते । (विश्वनाथ, : २०६८ : ७२४) ।

मेघदूते अतिशयोक्तेरुदाहरणं यथा–

आराध्यैन. शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ।। (कालिदास, पू.मे. ४५) ।

अस्मिन् श्लोके महाकविकालिदासः रन्तिदेवस्य कीर्तेः अतिशयवर्णनाय चरण्वतीनद्याः सह अध्यवसानात् अतिशयोक्ति अलङ्कारः ।

***रूपकम्***

उपमानोयमेययोरभेदारोपे रूपकालङ्कारः । रूपकालङ्कारे उपमानोपमेययोरतिसाम्यादभेदप्रतीतिरपन्हुता भवति । रूपकालङ्कारं यथा लक्ष्यति–

रूपकं रुपितारोपाद्विषये निरपन्हवे । (विश्वनाथ, २०६८ : ६७३) ।

रूपकालङ्कारास्य उदाहरणं यथा मेघदूते–

हित्वा तस्मिन्भुजगवलयं शम्भुना दत्तहस्ता
क्रिडाशैले यदि च विचरेत्पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवतुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ।। (कालिदासः, पू.मे. ६०) ।।

अस्मिन् श्लोके भुजंगवलयम् इत्यत्र भुजगमेव वलयम् इति सर्पे कंकणस्य अमेदारोपाद रूपकालङ्कारः।

***अनुमानालङ्कार***

अनुमानालङ्कारस्य लक्षणं यथा–

अनुमानं तु विच्छित्या ज्ञानं साध्यस्य साधनात् । (विश्वनाथः, १९८८: ८०६)

वैचित्र्यात् साधनज्ञानात् यत्र साध्यस्य ज्ञानं भवति तत्र अनुमानालङ्कारो भवति ।

अनुमानालङ्कारस्योदाहरणं यथा मेघदूते —

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः,
पत्रच्छेदैः, कनककमलैः कर्णविभ्रंशिभिश्च ।
मुक्ताजालैः, स्तनपरिसरच्छिन्नसूत्रैश्च हारै —
नैंशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ।। (कालिदासः, उ मे श्लो ९) ।

अत्र मन्दारपुष्पाद्येभ्यः साधनेभ्यः अभिसारिकाया मार्गरूपस्य साध्यस्य ज्ञानात् अनुमानालङ्कारः ।

***विशेषोक्तिः***

विशेषोक्तेर्लक्षणं यथा साहित्यदर्पणे—सति हेतौफलाभावे विशेषोक्तिर्निगद्यते(विश्वनाथ १९८८ : ८१५) । प्रसिद्धे कारणे विद्यमानेद्रपि कार्यस्यानुत्पत्तिः कथनं विशेषोक्तिर्भवति । तच्च उक्तनिमित्ता, अनुक्तनिमित्ता इति भेदेन द्विविधा । यथा मेघदूते विशेषोक्तेरुदाहरणम्–

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ।। (कालिदास , उ मे ५ ) ।

अत्र चूर्णमुष्टिरूपहेतुसत्वेऽपि रत्नप्रदीपस्य निर्वाणरूपकार्यस्य अभाववर्णनाद् विशेषोक्तिरलङ्कारः ।

***अर्थापत्तिरलङ्कारः***

दण्डापूपिकन्यायेन भिन्नार्थप्रतीतौ अर्थापत्तिरलङ्कारः । मूषिकेण दण्डो भक्षित इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका (विश्वनाथः,२०६८ : ८१६), मेघदूते अर्थापत्तेरुदाहरणं यथा –

त्वामालिख्य प्रणयकुपितां धातुरागै शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरूपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ।। (कालिदास , उ मे ४२) ।

अत्र कविर्कालिदासो यक्षस्य विलापं वर्णयति । अत्र तस्मिन्नपि अर्थात् शीलायां चित्रणेऽपि आवयो सङ्गमं न सहते क्रूरो विधाता, भौतिकशरीरसङ्गमस्य तु का वार्ता? अवश्यमेव न सहते इत्यर्थः समागच्छति, अतोऽत्र अर्थापत्तिरलङ्कारः।

***विकल्पः***

विकल्पालङ्कारस्य लक्षणं यथा साहित्यदर्पणे–

विकल्पस्तुल्यवलयो विरोधश्चातुरीयतः । (विश्वनाथः, १९८८ : ८४८) ।

कवेः चातुर्येण समानवलयो द्वयोः वस्तुनो परस्परविरोधस्य निरूपणं विकल्पालङ्कारः ।

विकल्पालङ्कारस्य उदाहरणं यथा मेघदूते–

उत्सङ्गे वा मलिनवसने सौम्य ! निक्षिप्तवीणां
मद्गोशङ्कं विरचितपदं गेयमुद्गातुकामा
तन्त्रीमाद्रा नयनसलिलैः सारयित्वा कथंचिद्
भूयो भूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ।। (कालिदास , उ मे. श्लोक २३)

अश्मिन् श्लोके कविः कालिदासः यक्षपत्न्या वीणावादनादयेन तस्य मनोविनोदं कथयति । तत्गाने स्वप्रियतमयक्षस्य नामोच्चारणकथनेन कवेः चातुर्येण द्वयोः विस्मरणस्मरणयोः समानवलयो विरोध निरूपणं भवति । अतः विकल्पालङ्कारः ।

***प्रतीपम्***

प्रसिद्धमुपमानस्य उपमेयत्वकल्पनं प्रतीपालङ्कारः। यथा–प्रतीपालङ्कारस्य लक्षणम्–प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम् । (दीक्षितः, १९७६ : १०)

मेघदूते प्रतीपालङ्कारस्योदाहरणं यथा–

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य ।

धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या–
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः । (कालिदासः,पू.मे. श्लोक ३३) ।।

अस्मिन् श्लोके नीलकण्ठस्य नीलदार्थ उपमान एव प्रसिद्धः । परन्तु अत्र मेघस्य उपमेयत्व कल्पनं प्रतीपालङ्कारः।

***स्मरणम्***

सदृशवस्तुदर्शनात् तत् सदृशान्यवस्तु स्मरणं स्मरणालङ्कारः ।

यथा साहित्यदर्पणे–

सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते । (विश्वनाथः, २०६८ : ६७५) ।

यथा मेघदूते स्मरणालङ्कारस्योदाहरणम्–

श्यामास्वङ्गं, चकितहरिणीप्रेक्षणे दृष्टिपातं,
वक्रच्छायां शशिनि, शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्,
हन्तैकस्मिन्क्वचिदपि न ते चण्डि ! सादृश्यमस्ति ।। (कालिदासः, उ.मे.श्लोक ४१) ।।

अत्र लतायां प्रियाया शरीरस्य, चकितमृगनयने तस्या नेत्रयोः, चन्द्रमसि तस्या मुखकान्त्याः, मयूरपिच्छकलापेषु तस्याः केशपासानाम्, नदीनां तरङ्गेषु तस्या भ्रूविलासस्य स्मरणं स्मरणालङ्कारः।

***स्वभावोक्तिः***

वालादेः स्वक्रियारूपयोः तत्तत्स्वाभाविकचेष्टाकारयोः स्वाभाविकवर्णनं स्वभावोक्तिः । स्वभावोक्तेः लक्षणं यथा साहित्यदर्पणे–

स्वभावोक्तिर्दुरुहार्थस्वक्रियारूपवर्णनम् (विश्वनाथः, २०६८ : ८३१)।

मेघदूते स्वभावोक्तेरुदाहरणं यथा–

आद्य बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टानयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण । (कालिदासः, उ.मे.२९) ।।

अत्र स्वप्रियवियुक्तायाः यक्षपत्न्या विभ्रमदशायाः स्वाभाविकवर्णनात् स्वभावोक्तिरलङ्कारः ।

***परिकरालङ्कारः***

परिकरालङ्कारस्य लक्षणं यथा–

उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः । (विश्वनाथः, १९८८ : ७८७) ।

यत्र विशेषणैः अभिप्राययुक्तता कथ्यते तत्र परिकरालङ्कारः । परिकरस्योदाहरणं यथा मेघदूते–

भर्तुर्मित्रं प्रियमविधवे ! विद्धि मामम्बुवाहं

तत्संदेशैर्हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिपोक्षोत्सुकानि ।। (कालिदासः,उ.मे. ३६ श्लोकः) ।।

अत्र यक्षस्य स्वप्रियायाः संवोधे हे अविधवे इति विशेषणेन् त्वत्पतिः जीवितमस्ति इत्यभिप्राययुक्तत्वाद् परिकरालङ्कारः ।

***संसृष्टिः***

परस्परनिरपेक्षाणामलङ्काराणां तिलतण्डुलन्यायेन संस्थिति संसृष्टिरलङ्कारः । यथा साहित्यदर्पणे संसृष्टिः- मिथोऽनपेक्षमेतेषां स्थितिः संसृष्टिरुच्यते । (विश्वनाथः, २०६८ : ८४३) तथा च अलङ्कारकौस्तुभे संसृष्टिष्तु –परस्परमनपेक्षस्थितिरनेकस्य (विश्वेश्वरपण्डितः, १९८७ : ४०८) । मेघदूते संसृष्टिरलङ्कारस्य उदाहरणं यथा -

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ ।
मेघालोके भवति सुखिनोद्रप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ।। (कालिदासः, पू मे ३) ।

अस्मिन् श्लोके पूर्वार्धस्थितस्य वाष्पावरुद्धरुपार्थस्य उत्तराद्धगतेन मेघालोके सति प्रियासहितानांमपि चित्तचञ्चलो भवति चेत् वियुक्तानां किं वक्तव्यं यत्यर्थः समर्थनाद् अर्थान्तरन्यासः एवं च कि पुनर्दूरसस्थे इत्यत्र दुरस्थितस्य जनस्य वक्तुं नावश्यकम् इति कैमुतिकन्यायेन अर्थापत्तिः । एतयोः अर्थान्तरार्थापत्योः मिथः अनपेक्षया वा तिलतण्डुलन्यायेन अवस्थानाद् संसृष्टिः।

***सङ्करः***

नीरक्षीरन्यायेन सङ्करालङ्कारोऽवतिष्ठते । एकाश्रये अङ्काङ्गित्वेन अलकाराणां अवस्थानं सङ्करः । यथा साहित्यदर्पणे–

अङ्गाङ्गित्वेऽलङ्कृत्तीनां तद्वदेकाश्रयस्थितौ । सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः । (विश्वनाथ ८४३)

सङ्करालङ्कारस्य उदाहरणं यथा मेघदूते–

तामायुष्मन्मम च वचनादात्मनश्चोपकर्तु
ब्रूया एवं तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले ! पृच्छति त्वां वियुक्तः
पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ।। (कालिदासः, उ.मे. ३८) ।।

अश्मिन् श्लोके यक्षो मेघं रात्रिं यापयित्वा सूर्योदिते सति शीघ्रं शेषमध्वं वाहयेत् । मित्राणां उपकाराय न मन्दायन्ते इति कथयति । अत्र “खिन्नविद्युत्कलत्र” इत्यत्र विद्युति कलत्रस्य आरोपः

रूपकालङ्कारः, तथा च पूर्वार्धस्थितस्य मेघ१ अध्वं वाहयेदिति विशेषवाक्यं, उत्तरार्धस्थितेन मित्राणामुपकाराय न मन्दायन्ते इति सामान्यवाक्येन समर्थनाद् अर्थान्तरन्यासः । तयोरूपकार्थान्तरन्यासयोः अङ्गाङ्गिभावेन अत्रावस्थानाद् सङ्करः ।

मेघदूत खण्डकाव्ये प्रयुक्तानलङ्कारान् निम्नानुसारेण तालिकायामपि दर्शयितुं शक्यते ।

| क्र.सं. | अलङ्कारः | श्लोकसंख्या | भाग |
|---|---|---|---|
| १ | अनुप्रासः | ३९ | उ.मे. |
| २ | यमकम् | ३० | पू.मे. |
| ३ | श्लेषः | २८ | पू.मे. |
| ४ | उपमा | ५२ | पू.मे. |
| ५ | अर्थान्तरन्यासः | ०६ | पू.मे. |
| ६ | काव्यलिङ्गम् | ०१ | पू.मे. |
| ७ | समासोक्तिः | १३ | पू.मे. |
| ८ | निदर्शना | ३६ | पू.मे. |
| ९ | तुल्ययोगिता | ११ | उ.मे. |
| १० | युक्तिः | ०५ | पू.मे. |
| ११ | उत्प्रेक्षा | ३१ | पू.मे. |
| १२ | परिणामः | २२ | पू.मे. |
| १३ | अतिशयोक्तिः | ४५ | पू.मे. |
| १४ | रूपकम् | ६० | पू.मे. |
| १५ | अनुमानम् | ०९ | उ.मे. |
| १६ | विशेषोक्तिः | ०५ | उ.मे. |
| १७ | अर्थापत्तिः | ४२ | उ.मे. |
| १८ | विकल्पः | २३ | उ.मे. |
| १९ | प्रतीपम् | ३३ | पू.मे. |
| २० | स्मरणम् | ४१ | उ.मे. |
| २१ | स्वभावोक्तिः | २९ | उ.मे. |
| २२ | परिकरः | ३६ | उ.मे. |
| २३ | संसृष्टिः | ०३ | पू.मे. |
| २४ | संङ्करः | २८ | उ.मे. |

उपरिनिर्दिष्टतालिकायां दर्शिता अलङ्कारा न केवलमेकस्मिन् श्लोके विद्यन्ते, अपितु अनेकेषु श्लोकेषु विद्यन्ते । एकस्मिन् श्लोके विभिन्नालङ्कारा अपि प्राप्यन्ते । अलङ्कारं कवेः कल्पनानुसारं भिन्नभिन्नमपि भवितुं शक्नोति । अत्र मे दृष्टिपथमागताः प्रमुखालङ्कारा एव विवेचिता निर्दिष्टाश्च ।

## निष्कर्षः

महाकविः कालिदासः संस्कृतसाहित्यक्षत्रे उज्जवलनक्षत्रो वर्तते । अस्य नाम न केवलं संस्कृतसाहित्ये अपितु सर्वस्मिन् साहित्यजगति अग्रगण्यमस्ति । अस्य काव्येषु रसभावगुणालङ्कारादीनां समुचितो विन्यासो प्राप्यते । काव्येषु गुणालङ्कारादीनां विन्यासे सिद्धहस्तो विद्यते महाकविः कालिदास इति प्रसिद्धमेव । अस्मिन् मेघदूतखण्डकाव्येऽपि कविः निर्जीवं मेघमपि सजीवमिव चित्रयितुं समर्थो दृश्यते । भागद्वये विभक्तस्य अस्य काव्यस्य श्रुतिमाधुर्यम्, प्रकृतिचित्रणम्, स्वाभाविकविप्रलम्भश्रृङ्गाररसपप्रवाहः अर्थान्तरन्यासादीनां विभिन्नानांमलङ्काराणां प्रयोगश्च अन्यकाव्येभ्यो विशिष्टो वर्तते । अस्मिन् काव्ये विशेषतः अर्थान्तरन्यासालङ्कारस्य विशेषविन्यासेन काव्यं व्यवहारिकमिव मन्यते । अत्रोपमानुप्रासयमकार्थान्तरन्यासः,काव्यलिङ्ग–तुल्ययोगिताउत्प्रेक्षा–परिणाम–निदर्शना–अतिशयोक्त्यादीनां त्रयोविंशतितःअधिकसंख्याकानां प्रमुखालङ्काराणां प्रयोगो विद्यते । अत्र प्रयुक्तैरलङ्कारैः खण्डकाव्यस्य कथावस्तु सजीवमिव प्रतिभाति । अलङ्काराः काव्यस्य शोभावर्धका धर्मा इत्यनुसारं काव्यमिदं चमत्कृतियुक्तं जातम् । अत्र प्रयुक्ता अलङ्काराः खण्डकाव्यस्य अङ्गिरसं विप्रलम्मश्रृङ्गारं परिपोषयितुं समर्था दृश्यते । अतः अलङ्काराणां प्रयोगदृष्ट्या मेघदूतमौचित्यपूर्णमस्ति । एतेषामलङ्काराणां विन्यासेन सुन्दरं काव्यं सामाजिकानां मनांसि अतिशयेन रञ्जयितुं समर्थोऽस्तीति ।

## सन्दर्भग्रन्थसूची


अप्पयदीक्षित (ई.१९७६), *कुवलयानन्द* (ष.सं.), (व्या.-भोलाशङ्कर व्यास), चौखम्बा विद्याभवन ।

आनन्दवर्धन, (ई. १९९२) *ध्वन्यालोक* (पं. सं), चौखम्बा विद्याभवन ।

उपाध्यायः, कृष्णदेव (ई. १९८२), *निबन्ध चन्द्रिका* (ष.सं.), चौखम्बा ओरियन्टालिया ।

उपाध्याय, बलदेवः (ई. १९९७), *संस्कृत साहित्य का इतिहास* (दो.सं.), शारदा निकेतन ।

कालिदासः (ई. १९९३), *अभिज्ञानशाकुन्तलम्* (व्या. कृष्णमणि त्रिपाठी), चौखम्बासुरभारती प्रकाशन ।

........(ई. १९९२), *मेघदूतम्* (दो सं.) (व्या. शेषराजशर्मा) चौखम्बा विद्याभवन ।

....... (२०३२), *रघुवंशमहाकाव्यम्,* (व्या. कृष्णमणि त्रिपाठी), चौखम्बा विद्याभवन ।

....... (ई.१९८७), *रघुवंशमहाकाव्यम्,* (द्वि.सं.), (व्या.जनार्दन पाण्डेय), मोतीलाल वनारसीदास ।

जगन्नाथः (ई.१९९३), *रसगंगाधर* (अ. सं.), चौखम्बा विद्याभवन ।

ज्ञवाली, कृष्णराज (२०७८), *रुरुप्रभा,* वर्ष-७, अंक-५, गुल्मी, रुरु संस्कृत विद्यापीठ ।

दण्डीः, (ई. १९९१), *काव्यादर्शः* (च सं.), चौखम्बा विद्याभवन ।

धनञ्जयः, (२०४२), *दशरूपकम्* (तृ.सं.), चौखम्बा विद्याभवन ।

मम्मटः (ई. २००६), *काव्यप्रकाशः* (ष. सं. पुनर्मुद्रित), (व्या. विश्वेश्वर) ज्ञानमण्डल लिमिटेड ।

रूय्यकः (ई.१९९४), *अलङ्कारसर्वस्वम्* (व्या. त्रिलोकीनाथ द्विवेदी), चौखम्बा सुरभारती प्रकाशन।

वामनः (ई. २००२), *काव्यालङ्कारसूत्राणि,* (व्या. हरगोविन्द शास्त्री), सुरभारती प्रकाशन ।
विश्वेश्वरः, (ई. १९८७), *अलङ्कारकौस्तुभम्,* चौखम्बा संस्कृत प्रतिष्ठान ।
विश्वनाथः, (२०६८), *साहित्यदर्पणम् (*व्या.कृष्णमोहनशास्त्री), चौखम्बा संस्कृत प्रतिष्ठान ।
......... *साहित्यदर्पणम्,* (स.सं.), (व्या. सिंहसत्यव्रतः), चौखम्बा संस्कृत प्रतिष्ठान ।
शुक्ल रमेश (ई. १९८३), *प्रबन्धरत्नाकरः,* (तृ.सं.), चौखम्बा विद्याभवन ।